# THE AYURVEDIC PHARMACOPOEIA OF INDIA

## PART - II (FORMULATIONS)
## VOLUME - II

**First Edition**

**Appendix-9,10,11**

सत्यमेव जयते

**GOVERNMENT OF INDIA**
**MINISTRY OF HEALTH AND FAMILY WELFARE**
**DEPARTMENT OF AYURVEDA, YOGA & NATUROPATHY, UNANI, SIDDHA AND HOMOEOPATHY,**
**NEW DELHI**
**2008**

# CONTENTS

**APPENDIX – 9. Classical Ayurvedic References** 293

**APPENDIX – 10. List of Single Drugs used in Formulations, with Latin Nomenclature** 316

10.1 List of Single Drugs of Animal origin used in Formulations, with equivalent English name 316

10.2 List of Single Drugs of metal /mineral origin used in Formulations, with equivalent English name 316

10.3 List of Single Drugs of plant origin used in Formulation, with Latin Nomenclature 317

**APPENDIX – 11. Bibliography** 32

# APPENDIX - 9
# Classical Ayurvedic References

## 1 : 1 ABHAYĀRIṢṬA (अभयारिष्ट) (AFI, Part-I)

(Bhaiṣajyaratnāvalī, Arśorogādhikāra ; 105-110)

अभयायास्तुलामेकां मृद्वीकाऽर्द्धतुलां तथा ।
विडङ्गस्य दशपलं मधूककुसमस्य च ।। 105 ।।
चतुर्द्रोणे जले पक्त्वा द्रोणमेवावशेषयेत् ।
शीतीभूते रसे तस्मिन् पूते गुडतुलां क्षिपेत् ।। 106 ।।
श्वदंष्ट्रां त्रिवृतां धान्यं धातकीमिन्द्रवारुणीम् ।
चव्यं मधुरिकां शुण्ठीं दन्तीं मोचरसं तथा ।। 107 ।।
पलयुग्ममितं सर्वं पात्रे महति मृण्मये ।
क्षिप्त्वा संरुध्य तत्पात्रं मासमात्रं निधापयेत् ।। 108 ।।
ततो जातरसं ज्ञात्वा परिस्राव्य रसं नयेत् ।
बलं कोष्ठञ्च वह्निञ्च वीक्ष्य मात्रां प्रयोजयेत् ।। 109 ।।
अर्शांसि नाशयेच्छीघ्रं तथाष्टावुदराणि च ।
वर्चोमूत्रविबन्धघ्नो वह्निं सन्दीपयेत् परम् ।। 110 ।।
(भैषज्यरत्नावली, अर्शोरोगाधिकार ; 105-110)

## 1 : 2 AMṚTĀRIṢṬA (अमृतारिष्ट) (AFI, Part-I)

(Bhaiṣajyaratnāvalī, Jvarādhikāra ; 690-693)

अमृतायाः पलशतं दशमूल्यास्तथैव च ।
पादावशिष्टं पक्त्वा च चतुर्द्रोणे जले भिषक् ।। 690 ।।
गुडस्य त्रितुलाः सिद्धे क्वाथे शीते क्षिपेत्पुनः ।
अजाज्याः षोडशपलं द्विपलं रक्तपुष्पकम् ।। 691 ।।
सप्तच्छदं तथा व्योषं नागकेशरमब्दकम् ।
कट्वीप्रतिविषे वत्सबीजञ्च पलसम्मितम् ।। 692 ।।
सर्वमेकीकृतं भाण्डे निदध्यान्मासमात्रकम् ।
अमृतारिष्ट इत्येष प्रोक्तो ज्वरकुलान्तकृत् ।। 693 ।।
(भैषज्यरत्नावली, ज्वराधिकार ; 690-693)

## 1 : 4 ARAVINDĀSAVA (अरविन्दासव) (AFI, Part-I)

(Bhaiṣajyaratnāvalī, Bālarogādhika ; 185-189)

अरविन्दमुशीरञ्च काश्मरीं नीलमुत्पलम् ।
मञ्जिष्ठैला बलामांसीरम्बुदं शारिवां शिवाम् ।। 185 ।।
बिभीतकवचाधात्रीः शटीं श्यामां सनीलिनीम् ।
पटोलं पर्पटं पार्थं मधूकं मधुकं मुराम् ।। 186 ।।
पलमानेन संगृह्य द्राक्षायाः पलविंशतिम् ।
धातकीं षोडशपलां जलद्रोणद्वये क्षिपेत् ।। 187 ।।
शर्करायास्तुलां तत्र तुलार्द्धं माक्षिकस्य च ।
मासं संस्थापयेद् भाण्डे मृत्तिकापरिनिर्मिते ।। 188 ।।
बालानां सर्वरोगघ्नो बलपुष्ट्यग्निवर्धनः ।
अरविन्दासवः प्रोक्त आयुष्यो ग्रहदोषहृत् ।। 189 ।।
(भैषज्यरत्नावली, बालरोगाधिकार ; 185-189)

## 1 : 5 AŚOKĀRIṢṬA (अशोकारिष्ट) (AFI, Part-I)

(Bhaiṣajyaratnāvalī, Strīrogādhikāra ; 114-117)

अशोकस्य तुलामेकाञ्चतुर्द्रोणे जले पचेत् ।
पादशेषे रसे पूते शीते पलशतद्वयम् ।। 114 ।।
दद्यात् गुडस्य धातक्याः पलषोडशिकं मतम् ।
अजाजीं मुस्तकं शुण्ठीं दार्व्युत्पलफलत्रिकम् ।। 115 ।।
आम्रास्थि जीरकं वासां चन्दनञ्च विनिक्षिपेत् ।
चूर्णयित्वा पलांशेन ततो भाण्डे निधापयेत् ।। 116 ।।
मासादूर्ध्वञ्च पीत्वैनमसृग्दररुजां जयेत् ।
ज्वरञ्च रक्तपित्तार्शोमन्दाग्नित्वमरोचकम् ।। 117 ।।
मेहशोथारुचिहरस्त्वशोकारिष्टसंज्ञितः ।।
(भैषज्यरत्नावली, स्त्रीरोगाधिकार ; 114-117)

## 1 : 6 AŚVAGANDHĀDYARIṢṬA (अश्वगन्धाद्यरिष्ट) (AFI, Part-I)

(Bhaiṣajyaratnāvalī, Mūrcchādhikāra ; 13-19)

तुलाद्र्धं चाश्वगन्धाया मुसल्याः पलविंशतिः ।
मञ्जिष्ठाया हरीतक्या रजन्योर्मधुकस्य च ।। 13 ।।
रास्नाविदारीपार्थानां मुस्तकत्रिवृतोरपि ।
भागान् दशपलान् दद्यादनन्ताश्यामयोस्तथा ।। 14 ।।

चन्दनद्वितयस्यापि वचायाश्चित्रकस्य च ।
भागानष्टपलान् क्षुण्णानष्टद्रोणेऽम्भसः पचेत् ।। 15 ।।
द्रोणशेषे कषायेऽस्मिन् पूते शीते प्रदापयेत् ।
धातक्याः षोडशपलं माक्षिकस्य तुलात्रयम् ।। 16 ।।
व्योषं तु द्विपलं ग्राह्यं त्रिजातकचतुष्पलम् ।
चतुष्पलं प्रियङ्गोश्च द्विपलं नागकेशरम् ।। 17 ।।
मासादूर्ध्वं पिबेदेनं कर्षैपीपरिमाणतः ।
मूर्च्छामपस्मृतिं शोषमुन्मादमपि दारुणम् ।। 18 ।।
कार्श्यमर्शांसि मन्दत्वमग्नेर्वातभवान् गदान् ।
अश्वगन्धाद्यरिष्टोऽयं पीतो हन्यादसंशयम् ।। 19 ।।
(भैषज्यरत्नावली, मूर्च्छाधिकार ; 13-19)

## 1 : 3 BABBŪLĀRIṢṬA (बब्बूलारिष्ट) (AFI, Part-II)

(Śārṅgadharasaṁhitā, Madhyamakhaṇḍa, Adhyāya 10 ; 66-68$^{1}/_{2}$)

तुलाद्वयं तु बब्बूल्याश्चतुर्द्रोणे जले पचेत् ।
द्रोणशेषे रसे शीते गुडस्य च तुलां क्षिपेत् ।। 66 ।।
धातकीं षोडशपलां कृष्णां च द्विपलां तथा ।
जातीफलानि कङ्कोलमेलात्वक्पत्रकेशरम् ।। 67 ।।
लवङ्गं मरिचं चैव पलिकान्युपकल्पयेत् ।
मासं भाण्डे स्थितस्त्वेष बब्बूलारिष्टको जयेत् ।। 68 ।।
क्षयं कुष्ठमतीसारं प्रमेहश्वासकासकम् ।
(शाङ्र्गधरसंहिता, मध्यमखण्ड, अध्याय 10 ; 66-68$^{1}/_{2}$)

## 1 : 24 BALĀRIṢṬA (बलारिष्ट) (AFI, Part-I)

(Bhaiṣajyaratnāvalī, Vātavyādhyadhikāra ; 569-572)
बलाश्वगन्धयोर्ग्राह्यं पृथक् पलशतं शुभम् ।
चतुर्द्रोणे जले पक्त्वा द्रोणमेवावशेषयेत् ।। 569 ।।
शीते तस्मिन् रसे पूते क्षिपेद् गुडतुलात्रयम् ।
धातकीं षोडशपलां पयस्यां द्विपलांशिकाम् ।। 570 ।।
पञ्चाङ्गुलपलद्वन्द्वं रास्नामेलां प्रसारणीम् ।
देवपुष्पमुशीरञ्च श्वदंष्ट्राञ्च पलांशिकाम् ।। 571 ।।
मासं भाण्डे स्थितस्त्वेष बलारिष्टो महाफलः ।
हन्त्युग्रान् वातजान् रोगान् बलपुष्ट्यग्निवर्धनः ।। 572 ।।
(भैषज्यरत्नावली, वातव्याध्यधिकार ; 569-572)

## 1 : 18 DAŚAMŪLĀRIṢṬA (दशमूलारिष्ट) (AFI, Part-I)

(Śārṅgadharasaṁhitā, Madhyamakhaṇḍa, Adhyāya ; 10 ; 78-92)

दशमूलानि कुर्वीत भागैः पञ्चपलैः पृथक् ।। 78 ।।
पञ्चविंशत्पलं कुर्याच्चित्रकं पौष्करं तथा ।
कुर्याद्विंशत्पलं लोध्रं गुडूची तत्समा भवेत् ।। 79 ।।
पलैः षोडशभिर्धात्री रविसंख्यैर्दुरालभा ।
खदिरो बीजसारश्च पथ्या चेति पृथक्पलैः ।। 80 ।।
अष्टभिर्गणितैः कुष्ठं मञ्जिष्ठा देवदारु च ।
विडङ्गं मधुकं भार्गी कपित्थोऽक्षः पुनर्नवा ।। 81 ।।
चव्यं मांसी प्रियंगुश्च सारिवा कृष्णजीरकम् ।
त्रिवृता रेणुकं रास्ना पिप्पली क्रमुकः शठी ।। 82 ।।
हरिद्रा शतपुष्पा च पद्मकं नागकेशरम् ।
मुस्तमिन्द्रयवः शृङ्गी जीवकर्षभकौ तथा ।। 83 ।।
मेदा चान्या महामेदा काकोल्यौ ऋद्धिवृद्धिके ।
कुर्यात्पृथग्द्विपलिकान्पचेदष्टगुणे जले ।। 84 ।।
चतुर्थांशं शृतं नीत्वा मृद्भाण्डे सन्निधापयेत् ।
ततः षष्टिपलां द्राक्षां पचेन्नीरे चतुर्गुणे ।। 85 ।।
त्रिपादशेषं शीतं च पूर्वक्वाथे शृतं क्षिपेत् ।
द्वात्रिशंत्पलिकं क्षौद्रं दद्याद्गुडचतुःशतम् ।। 86 ।।
त्रिंशंत्पलिकं धातक्याः कंकोलं जलचन्दनम् ।
जातीफलं लवङ्गं च त्वगेलापत्रकेशरम् ।। 87 ।।
पिप्पली चेति सञ्चूर्ण्य भागैर्द्विपलिकैः पृथक् ।
शाणमात्रां च कस्तूरीं सर्वमेकत्र निक्षिपेत् ।। 88 ।।
भूमौ निखातयेद्भाण्डं ततो जातरसं पिबेत् ।
कतकस्य फलं क्षिप्त्वा रसं निर्मलतां नयेत् ।। 89 ।।
ग्रहणीमरुचिं श्वासं कासं गुल्मं भगन्दरम् ।
वातव्याधिं क्षयं छर्दिं पाण्डुरोगं च कामलाम् ।। 90 ।।
कुष्ठान्यर्शांसि मेहांश्च मन्दाग्निमुदराणि च ।
शर्करामश्मरीं मूत्रकृच्छ्रं धातुक्षयं जयेत् ।। 91 ।।
कृशानां पुष्टिजननो वन्ध्यानां गर्भदः परः ।
अरिष्टो दशमूलाख्यस्तेजःशुक्रबलप्रदः ।। 92 ।।
(शाङ्र्गधरसंहिता, मध्यमखण्ड, अध्याय 10 ; 78-92)

## 1 : 20 DRĀKṢĀRIṢṬA (द्राक्षारिष्ट) (AFI, Part-I)

(Śārṅgadharasaṁhitā, Madhyamakhaṇḍa, Adhyāya 10 ; 69-72$^{1}/_{2}$)

द्राक्षातुलाऽर्द्धं द्विद्रोणे जलस्य विपचेत्सुधीः ।। 69 ।।
पादशेषे कषाये च पूते शीते विनिक्षिपेत् ।
गुडस्य द्वितुलां तत्र त्वगेलापत्रकेशरम् ।। 70 ।।
प्रियंगुर्मरिचं कृष्णा विडङ्गं चेति चूर्णयेत् ।
पृथक्पलोन्मितैर्भागैस्ततो भाण्डे निधापयेत् ।। 71 ।।
समन्ततो घट्टयित्वा पिबेज्जातरसं ततः ।
उरःक्षतं क्षयं हन्ति कासश्वासगलामयान् ।। 72 ।।
द्राक्षारिष्टाह्वयः प्रोक्तो बलकृन्मलशोधनः ।
(शाङ्र्गधरसंहिता, मध्यमखण्ड, अध्याय 10 ; 69-72$^{1}/_{2}$)

## 1 : 1 DRĀKṢĀSAVA (द्राक्षासव) (AFI, Part-II)

(Bhaiṣajyaratnāvalī, Arśorogādhikāra ; 1-5)

द्राक्षापलशतं दत्त्वा चतुर्द्रोणेऽम्भसः पचेत् ।
द्रोणशेषे रसे तस्मिन् पूते शीते प्रदापयेत् ।। 1 ।।
शर्करायास्तुलां दत्त्वा तत्तुल्यं मधुनस्तथा ।
पलानि सप्त धातक्याः स्थापयेदाज्यभाजने ।। 2 ।।
जातीलवङ्गकक्कोललवलीफलचन्दनैः ।
कृष्णात्रिगन्धसंयुक्तैर्भागैरर्द्धपलांशकैः ।। 3 ।।
त्रिसप्ताहाद् भवेत् पेयं तस्य मात्रा यथाबलम् ।
नाम्ना द्राक्षासवो ह्येष नाशयेद् गुदकीलकान् ।। 4 ।।
शोषारोचकहृत्पाण्डुरक्तपित्तभगन्दरान् ।
गुल्मोदरकृमिग्रन्थिक्षतशोषज्वरान्तकृत् ।
वातपित्तप्रशमनः शस्तश्च बलवर्णकृत् ।। 5 ।।
(भैषज्यरत्नावली, अर्शोरोगाधिकार ; 1-5)

## 1 : 16 JĪRAKĀDYARIṢṬA (जीरकाद्यरिष्ट) (AFI, Part-I)

(Bhaiṣajyaratnāvalī, Strīrogādhikāra ; 492-495)

जीरकस्य तुलाद्वन्द्वं चतुर्द्रोणजले पचेत् ।
द्रोणशेषे क्षिपेत्तत्र तुलात्रयमितं गुडम् ।। 492 ।।
धातकीं षोडशपलां शुण्ठीञ्च द्विपलोन्मिताम् ।
जातीफलं मुस्तकञ्च चातुर्जातं यमानिकाम् ।। 493 ।।

कक्कोलं देवपुष्पञ्च पलमानेन निक्षिपेत् ।
मासं संस्थाप्य भाण्डे च मृत्तिकापरिनिर्मिते ।। 494 ।।
ततः कल्कान् विनिर्हृत्य पाययेत् कर्षमात्रया ।
अरिष्टो जीरकाख्योऽयं निहन्यात् सूतिकामयान् ।
ग्रहणीमतिसारञ्च तथा वह्नेश्च वैकृतम् ।। 495 ।।
(भैषज्यरत्नावली, स्त्रीरोगाधिकार ; 492-495)

## 1 : 9 KANAKĀSAVA (कनकासव) (AFI, Part-I)

(Bhaiṣajyaratnāvalī, Hikkāśvāsādhikāra ; 98-102)

सङ्क्षुद्य कनकं शाखामूलपत्रफलैः सह ।
ततश्चतुष्पलं ग्राह्यं वृषमूलत्वचस्तथा ।। 98 ।।
मधूकं मागधी व्याघ्री केशरं विश्वभेषजम् ।
भाङ्र्गी तालीशपत्रञ्च सञ्चूर्ण्यैषां पलद्वयम् ।। 99 ।।
सङ्गृह्य धातकीप्रस्थं द्राक्षायाः पलविंशतिम् ।
जलद्रोणद्वयं दत्त्वा शर्करायास्तुलां तथा ।। 100 ।।
क्षौद्रस्यार्धतुलाञ्चापि सर्वं सम्मिश्र्य यत्नतः ।
भाण्डे निक्षिप्य चावृत्य निदध्यान्मासमात्रकम् ।। 101 ।।
निहन्ति निखिलान् श्वासान् कासं यक्ष्माणमेव च ।
क्षतक्षीणं ज्वरं जीर्णं रक्तपित्तमुरःक्षतम् ।। 102 ।।
(भैषज्यरत्नावली, हिक्काश्वासाधिकार ; 98-102)

## 1 : 14 KHADIRĀRIṢṬA (खदिरारिष्ट) (AFI, Part-I)

(Śārṅgadharasaṁhitā, Madhyamakhaṇḍa, Adhyāya ; 10 ; 60-65)

खदिरस्य तुलाऽद्र्धं तु देवदारु च तत्समम् ।
बाकुची द्वादशपला दार्वी स्यात्पलविंशतिः ।। 60 ।।
त्रिफला विंशतिपला ह्यष्टद्रोणेऽम्भसः पचेत् ।
कषाये द्रोणशेषे च पूते शीते विनिक्षिपेत् ।। 61 ।।
तुलाद्वयं माक्षिकस्य तुलैका शर्करा मता ।
धातक्या विंशतिपलं कंकोलं नागकेशरम् ।। 62 ।।
जातीफलं लवङ्गैलात्वक्पत्राणि पृथक् पृथक् ।
पलोन्मितानि कृष्णाया दद्यात्पलचतुष्टयम् ।। 63 ।।
घृतभाण्डे विनिक्षिप्य मासादूर्ध्वं पिबेन्नरः ।
महाकुष्ठानि हृद्रोगं पाण्डुरोगार्बुदे तथा ।। 64 ।।
गुल्मं ग्रन्थिं कृमीन्कासं श्वासं प्लीहोदरं जयेत् ।
एष वै खदिरारिष्टः सर्वकुष्ठनिवारणः ।। 65 ।।
(शाङ्र्गधरसंहिता, मध्यमखण्ड, अध्याय 10 ; 60-65)

## 1 : 13 KUMĀRYĀSAVA (B) कुमार्यासव (ख) (AFI, Part-I)

(Yogaratnākara, Gulmacikitsā page 527)

कुमार्याश्च रसद्रोणे गुडं पलशतं तथा ।
तुलाङ्घ्रिसंख्यां विजयां क्वाथयेत्तज्जलार्मणे ।। 1 ।।
चतुर्थांशावशेषे तु पूते तस्मिन्निधापयेत् ।
मधुनश्चाऽऽढकं दत्त्वा धातक्या द्विपलाष्टकम् ।। 2 ।।
स्निग्धभाण्डे विनिक्षिप्य कल्कं चैव प्रदापयेत् ।
जातीफलं लवङ्गं च कंकोलं च कबाबकम् ।। 3 ।।
जटिलाचव्यचित्रं च जातिपत्री सकर्कटम् ।
अक्षं पुष्करमूलं च प्रत्येकं च पलं पलम् ।। 4 ।।
मृतं शुल्वं तथा लोहं शुक्तिमात्रं प्रदापयेत् ।
भूम्यां वा धान्यराशौ वा स्थापयेद्दिनविंशतिम् ।। 5 ।।
तमुद्धृत्य पिबेन्मात्रां यथा चाग्निबलाबलम् ।
पञ्चकासं तथा श्वासं क्षयरोगं च दारुणम् ।। 6 ।।
उदराणि तथाऽष्टौ च षडर्शांसि च नाशयेत् ।
वातव्याधिमपस्मारमन्यान् रोगान् सुदारुणान् ।। 7 ।।
(योगरत्नाकर, गुल्मचिकित्सा ; पृष्ठ 527)

## 1 : 11 KUṬAJĀRIṢṬA (कुटजारिष्ट) (AFI, Part-I)

(Bhaiṣajyaratnāvalī, Atīsārādhikāra ; 97-99)

तुलां कुटजमूलस्य मृद्वीकार्द्धतुलां तथा ।
मधूकपुष्पकाश्मर्योर्भागान् दशपलोन्मितान् ।। 97 ।।
चतुर्द्रोणेऽम्भसः पक्त्वा द्रोणञ्चैवावशेषितम् ।
धातक्या विंशतिपलं गुडस्य च तुलां क्षिपेत् ।। 98 ।।
मासमात्रं स्थितो भाण्डे कुटजारिष्टसंज्ञितः ।
ज्वरान् प्रशमयेत् सर्वान् कुर्यात्तीक्ष्णं धनञ्जयम् ।
दुर्वारां ग्रहणीं हन्ति रक्तातीसारमुल्बणम् ।। 99 ।।
(भैषज्यरत्नावली, अतीसाराधिकार; 97-99)

## 1 : 32 LOHĀSAVA (लोहासव) (AFI, Part-I)

(Śārṅgadharasaṁhitā, Madhyamakhaṇḍa, Adhyāya 10 ; 34-38)

लोहचूर्णं त्रिकटुकं त्रिफलां च यवानिकाम् ।
विडङ्गं मुस्तकं चित्रं चतु:संख्यापलं पृथक् ।। 34 ।।
धातकीकुसुमानां तु प्रक्षिपेत् पलविंशतिम् ।
चूर्णीकृत्य ततः क्षौद्रं चतु:षष्टिपलं क्षिपेत् ।। 35 ।।
दद्याद्गुडतुलां तत्र जलद्रोणद्वयं तथा ।
घृतभाण्डे विनिक्षिप्य निदध्यान्मासमात्रकम् ।। 36 ।।
लोहासवममुं मर्त्यः पिबेद्वह्निकरं परम् ।
पाण्डुश्वयथुगुल्मानि जठराण्यर्शसां रुजम् ।। 37 ।।
कुष्ठं प्लीहामयं कण्डूं कासं श्वासं भगन्दरम् ।
अरोचकं च ग्रहणीं हृद्रोगं च विनाशयेत् ।। 38 ।।
(शाङ्र्गधरसंहिता, मध्यमखण्ड, अध्याय 10 ; 34-38)

## 1 : 26 MUSTAKĀRIṢṬA (मुस्तकारिष्ट) (AFI, Part-I)

(Bhaiṣajyaratnāvalī, Agnimādyādirogādhikāra ; 108-111)

मुस्तकस्य तुलाद्वन्द्वं चतुर्द्रोणेऽम्बुनः पचेत् ।
पादशेषे रसे तस्मिन् क्षिपेद् गुडतुलात्रयम् ।। 108 ।।
धातकीं षोडशपलां यमानीं विश्वभेषजम् ।
मरिचं देवपुष्पञ्च मेथीं वह्निञ्च जीरकम् ।। 109 ।।
पलयुग्ममितं क्षिप्त्वा रुद्धभाण्डे निधापयेत् ।
संस्थाप्य मासमात्रन्तु ततः संस्रावयेद् भिषक् ।। 110 ।।
अजीर्णमग्निमान्द्यञ्च विसूचीमपि दारुणाम् ।
ग्रहणीं विविधां हन्ति नात्र कार्या विचारणा ।। 111 ।।
(भैषज्यरत्नावली, अग्निमान्द्यादिरोगाधिकार ; 108-111)

## 1 : 21 PĀRTHĀDYARIṢṬA (पार्थाद्यरिष्ट) (AFI, Part-I)

(***Synonym*** - Arjunāriṣṭa) **(पर्याय- अर्जुनारिष्ट)**

(Bhaiṣajyaratnāvalī, Hṛdrogādhikāra ; 73-75)
पार्थत्वचस्तुलामेकां मृद्वीकार्द्धतुलां तथा ।
भागं मधूकपुष्पस्य पलविंशतिसम्मितम् ।। 73 ।।
चतुर्द्रोणेऽम्भसः पक्त्वा द्रोणमेवावशेषयेत् ।
धातक्या विंशतिपलं गुडस्य च तुलां क्षिपेत् ।। 74 ।।

मासमात्रं स्थितो भाण्डे भवेत्पार्थाद्यरिष्टकः ।
हृत्फुफ्फुसगदान् सर्वान् हन्त्ययं बलवीर्यकृत् ।। 75 ।।
(भैषज्यरत्नावली, हृद्रोगाधिकार; 73-75)

## 1 : 22 PIPPALYĀDYĀSAVA (पिप्पल्याद्यासव) (AFI, Part-I)

(Śārṅgadharasaṁhitā, Madhyamakhaṇḍa, Adhyāya 10 ; 28-33)

पिप्पली मरिचं चव्यं हरिद्रा चित्रको घनः ।। 28 ।।
विडङ्गं क्रमुको लोध्रः पाठा धात्र्येलवालुकम् ।
उशीरं चन्दनं कुष्ठं लवङ्गं तगरं तथा ।। 29 ।।
मांसी त्वगेलापत्रं च प्रियङ्गुर्नागकेशरम् ।
एषामर्धपलान्भागान्सूक्ष्मचूर्णीकृताञ्छुभान् 30 ।।
जलद्रोणद्वये क्षिप्त्वा दद्याद्गुडतुलात्रयम् ।
पलानि दश धातक्या द्राक्षा षष्टिपला भवेत् ।। 31 ।।
एतान्येकत्र संयोज्य मृद्भाण्डे च विनिक्षिपेत् ।
ज्ञात्वाऽऽगतरसं सर्वं पाययेदग्न्यपेक्षया ।। 32 ।।
क्षयं गुल्मोदरं कार्श्यं ग्रहणीं पाण्डुतां गदम् ।
अर्शांसि नाशयेच्छीघ्रं पिप्पल्याद्यासवस्त्वयम् ।। 33 ।।
(शाङ्गर्धरसंहिता, मध्यमखण्ड, अध्याय 10 य 28.33द्ध

## 1 : 2 PUNARNAVADYĀRIṢṬA (पुनर्नवाद्यरिष्ट) (AFI, Part-II)

(Bhaiṣajyaratnāvalī, Śotharogādhikāra ; 192-196)

पुनर्नवे द्वे बले सपाठे वासा गुडूची सहचित्रकेण ।
निदिग्धिका च त्रिपलानि पक्त्वा द्रोणार्द्धशेषे सलिले ततस्तु ।। 192 ।।
पूत्वा रसं द्वे च गुडात्पुराणात् तुले मधुप्रस्थयुतं सुशीतम् ।
मासं निदध्याद् घृतभाजनस्थं पर्णे यवानां परतश्च मासात् ।। 193 ।।
चूर्णीकृतैरर्द्धपलांशिकैस्तं हेमत्वगेलामरिचाम्बुपत्रैः ।
गन्धान्वितं क्षौद्रघृतप्रदिग्धं जीर्णे पिबेद् व्याधिबलं समीक्ष्य ।। 194 ।।
हृत्पाण्डुरोगं श्वयथुं प्रवृद्धं प्लीहभ्रमारोचकमेहगुल्मान् ।
भगन्दरं षड् जठराणि कासं श्वासं ग्रहण्यामयकुष्ठकण्डूः ।। 195 ।।
शाखानिलं बद्धपुरीषताञ्च हिक्कां किलासञ्च हलीमकञ्च ।
क्षिप्रं जयेद् वर्णबलायुरोगस्तेजोन्वितो मांसरसान्नभोजी ।। 196 ।।
(भैषज्यरत्नावली, शोथरोगाधिकार ; 192-196)

**1 : 23 PUNARNAVĀSAVA (पुनर्नवासव) (AFI, Part-I)**

(Bhaiṣajyaratnāvalī, Śotharogādhikāra ; 197-201)

त्रिकटुं त्रिफलां दार्वीं श्वदंष्ट्रां बृहतीद्वयम् ।
वासामेरण्डमूलञ्च कटुकां गजपिप्पलीम् 197 ।।
शोथघ्नीं पिचुमर्द्दञ्च गुडूचीं शुष्कमूलकम् ।
दुरालभां पटोलं च पलांशेन विचूर्णयेत् ।। 198 ।।
धातकीं षोडशपलां द्राक्षायाः पलविंशतिम् ।
तुलामानां सितां दत्त्वा माक्षिकार्द्धतुलां तथा ।। 199 ।।
जलद्रोणद्वयं क्षिप्त्वा मासं भाण्डे निधापयेत् ।
पुनर्नवासवो ह्येष शोथोदरविनाशनः ।। 200 ।।
प्लीहानमम्लपित्तञ्च यकृद्गुल्मज्वरादिकान्
कृच्छ्रसाध्यामयान् सर्वान् नाशयेन्नात्र संशयः ।। 201 ।।
(भैषज्यरत्नावली, शोथरोगाधिकार य 197.201द्ध

**1 : 31 ROHĪTAKĀRIṢṬA (रोहीतकारिष्ट) (AFI, Part-I)**

(Bhaiṣajyaratnāvalī, Plīhayakṛdrogādhikāra ; 84-87.)

रोहीतकतुलामेकाञ्चतुर्द्रोणे जले पचेत् ।
पादशेषे रसे पूते शीते पलशतद्वयम् ।। 84 ।।
दद्याद् गुडस्य धातक्याः पलषोडशिका मता ।
पञ्चकोलं त्रिजातं च त्रिफलाञ्च विनिक्षिपेत् ।। 85 ।।
चूर्णयित्वा पलांशेन ततो भाण्डे निधापयेत् ।
मासादूर्ध्वं च पिबतां गुदजा यान्ति संक्षयम् ।। 86 ।।
ग्रहणीपाण्डुहृद्रोगप्लीहगुल्मोदराणि च ।
कुष्ठशोफारुचिहरो रोहीतारिष्टसंज्ञकः ।। 87 ।।
(भैषज्यरत्नावली, प्लीहयकृद्रोगाधिकार ; 84-87.)

**1 : 37 SĀRIVĀDYĀSAVA (सारिवाद्यासव) (AFI, Part-I)**

(Bhaiṣajyaratnāvalī, Pramehapiḍakādhikāra ; 22-27)
शारिवां मुस्तकं लोध्रं न्यग्रोधं पिप्पलं शटीम् ।
अनन्तां पद्मकं बालं पाठां धात्रीं गुडूचिकाम् ।। 22 ।।
उशीरं चन्दनद्वन्द्वं यमानीं कटुरोहिणीम् ।
पत्रमेलाद्वयं कुष्ठं स्वर्णपत्रीं हरीतकीम् ।। 23 ।।
एषां चतुष्पलान् भागान् सूक्ष्मचूर्णीकृतान् शुभान् ।
जलद्रोणद्वये क्षिप्त्वा दद्याद् गुडतुलात्रयम् ।। 24 ।।

पलानि दश धातक्या द्राक्षां षष्ठिपलां तथा ।
मासं संस्थापयेद् भाण्डे संवृते मृण्मये शुभे ।। 25 ।।
शारिवाद्यासवस्यास्य पानान्मेहाश्च विंशतिः ।
शराविकादयः सर्वाः पिडकास्तत्कृताश्च याः ।। 26 ।।
औपदंशिकरोगाश्च वातरक्तं भगन्दरम् ।
सर्व एते शमं यान्ति व्याधयो नात्र संशयः ।। 27 ।।
(भैषज्यरत्नावली, प्रमेहपिडकाधिकार ; 22-27)

## 1 : 8 UŚĪRĀSAVA (उशीरासव) (AFI, Part-I)

(Bhaiṣajyaratnāvalī, Raktapittādhikāra ; 137-141)

उशीरं बालकं पद्मं काश्मर्यं नीलमुत्पलम् ।
प्रियङ्गुं पद्मकं लोध्रं मञ्जिष्ठां धन्वयासकम् ।। 137 ।।
पाठां किराततिक्तञ्च न्यग्रोधोदुम्बरं शटीम् ।
पर्पटं पुण्डरीकं च पटोलं काञ्चनारकम् ।। 138 ।।
जम्बूशाल्मलिनिर्यासं प्रत्येकं पलसम्मितम् ।
सर्वं सुचूर्णितं कृत्वा द्राक्षायाः पलविंशतिम् ।। 139 ।।
धातकीं षोडशपलां जलद्रोणद्वये क्षिपेत् ।
शर्करायास्तुलां दत्त्वा क्षौद्रस्यार्द्धतुलां तथा ।। 140 ।।
मासं संस्थापयेद् भाण्डे मांसीमरिचधूपिते ।
उशीरासव इत्येष रक्तपित्तविनाशनः ।
पाण्डुकुष्ठप्रमेहार्शःकृमिशोथहरस्तथा ।। 141 ।।
(भैषज्यरत्नावली, रक्तपित्ताधिकार ; 137-141)

## 3 : 14 DAŚAMŪLA HARĪTAKĪ (दशमूल हरीतकी) (AFI, Part-I)

(Aṣṭāṅgahṛdaya, Cikitsāsthāna, Adhyāya 17 ; 14-16)

दशमूलकषायस्य कंसे पथ्याशतं पचेत् ।। 14 ।।
दत्वा गुडतुलां तस्मिन् लेहे दद्याद्विचूर्णितम् ।
त्रिजातकं त्रिकटुकं किञ्चिच्च यवशूकजम् ।। 15 ।।
प्रस्थार्धं च हिमे क्षौद्रात्तन्निहन्त्युपयोजितम् ।।
प्रवृद्धशोफज्वरमेहगुल्मकार्श्यामवाताम्लकरक्तपित्तम् ।
वैवर्ण्यमूत्रानिलशुक्रदोषश्वासारुचिप्लीहगरोदरं च ।। 16 ।।
(अष्टाङ्गहृदय चिकित्सास्थान, अध्याय 17 ; 14-16)

### 3 : 15 DRĀKṢĀVALEHA (द्राक्षावलेह) (AFI, Part-I)

(Aṣṭāṅgahṛdaya, Cikitsāsthāna, Adhyāya 16 ; 29-31.)

द्राक्षाप्रस्थं कणाप्रस्थं शर्करार्धतुलां तथा ।। 29 ।।
द्विपलं मधुकं शुण्ठीं त्वक्क्षीरीं च विचूर्णिताम् ।
धात्रीफलरसद्रोणे तत्क्षिप्त्वा लेहवत्पचेत् ।। 30 ।।
शीतान्मधुप्रस्थयुताद् लिह्यात्पाणितलं ततः ।
हलीमकं पाण्डुरोगं कामलां च नियच्छति ।। 31 ।।
(अष्टाङ्गहृदय चिकित्सास्थान, अध्याय 16 ; 29-31.)

### 3 : 3 ELĀDYA MODAKA(एलाद्य मोदक) (AFI, Part-I)

(Bhaiṣajyaratnāvalī, Madātyayādhikāra ; 17-20.)

एलां मधूकमग्निञ्च रजन्यौ द्वे फलत्रयम् ।
रक्तशालिं कणां द्राक्षां खर्जूरञ्च तिलं यवान् ।। 17 ।।
विदारीं गोक्षुर बीजं त्रिवृताञ्च शतावरीम् ।
सञ्चूर्ण्य मोदकं कुर्यात् सितया द्विप्रमाणया ।। 18 ।।
धारोष्णेनापि पयसा मुद्गयूषेण वा समम् ।
पिबेदक्षप्रमाणन्तु प्रातर्नत्वाम्बिकां गदी ।। 19 ।।
मद्यपानसमुत्थानां विकारा निखिला अपि ।
सेवनादस्य नश्यन्ति व्याधयोऽन्ये च दारुणाः ।। 20 ।।
(भैषज्यरत्नावली, मदात्ययाधिकार ; 17-20.)

### 3 : 19 MADHUSNUHĪ RASĀYANA (मधुस्नुही रसायन) (AFI, Part-I)

( Sahasrayoga, Lehaprakaraṇa ; 41.)

त्रिकटुत्रिफलात्रिजातजातीफलपत्राग्निवरालधान्यकानि ।
यवानीविडङ्गचव्यकुष्ठत्रिवृद्ग्रन्थिकवाजिन्धयुतानि ।। 1 ।।
सभाङ्र्गीतेजोवतिकेसराणिनिष्कद्वयोन्मानविचूर्णितानि ।
संशुद्धगन्धोपलमाहिषाक्षमधुस्नुहीनां च चतुष्पलानि ।। 2 ।।
द्विषट्पलोन्मानघृते विपक्वे सिता पलद्वादशकं क्षिपेच्च ।
ततोन्मथित्वा तु खजेन तस्मिन्सुपाकमायाति ततोऽवतार्य ।। 3 ।।
पूर्वोक्तचूर्णानि विकीर्य शीतेगन्धोपलस्यापि रजांसि दत्त्वा ।। 4 ।।
संयोज्य सम्यक्च सुशीतलेऽस्मिन् प्रस्थं प्रदद्यान्मधुनः सुपात्रे ।
विन्यस्य गुप्तं तु रसायनं तत् प्रातर्लिहेत्कर्षयुतं हिताशी ।
कुष्ठं किलासं पिटकान्प्रमेहान् भगंदरार्शोऽर्बुदगण्डमालाः ।। 5 ।।

निहन्ति कण्ड्वामयावातरक्तपित्तोद्भवान्गुह्यभवान्व्रणांश्च ।
रसायनोऽयं मुनिना कृतश्च मधुस्नुहीनामक एष मुख्यः ।। 6 ।।
(सहस्रयोग, लेहप्रकरण ; 41.)

## 7 : 27 BHĀSKARALAVAṆA CŪRṆA (भास्करलवण चूर्ण) (AFI, Part-I)

(*Synonym* : Lavaṇabhāskara Cūrṇa )(पर्यायः लवणभास्कर चूर्ण)
(Śārṅgadharasaṁhitā, Madhyamakhaṇḍa, Adhyāya 6 ; 138-144)

सामुद्रलवणं कार्यमष्टकर्षमितं बुधैः ।
पञ्चसौवर्चलं ग्राह्यं बिडं सैन्धवधान्यकात् ।। 138 ।।
पिप्पली पिप्पलीमूलं कृष्णजीरकपत्रकम् ।
नागकेशरतालीसमम्लवेतसकं तथा ।। 139 ।।
द्विकर्षमात्राण्येतानि प्रत्येकं कारयेद् बुधः ।
मरिचं जीरकं विश्वमेकैकं कर्षमात्रकम् ।। 140 ।।
दाडिमं स्याच्चतुष्कर्षं त्वगेले चार्द्धकार्षिके ।
एतच्चूर्णीकृतं सर्वं लवणं भास्कराभिधम् ।। 141 ।।
शाणप्रमाणं देयं तु मस्तुतक्रसुरासवैः ।
वातश्लेष्मभवं गुल्मं प्लीहानमुदरं क्षयम् ।। 142 ।।
अर्शांसि ग्रहणीं कुष्ठं विबिन्धं च भगन्दरम् ।
शोफं शूलं श्वासकासावामवातञ्च हृद्रुजम् ।। 143 ।।
मन्दाग्निं नाशयेदेतद् दीपनं पाचनं परम् ।
सर्वलोकहितार्थाय भास्करेणोदितं पुरा ।। 144 ।।
(शाङ्र्गधरसंहिता, मध्यमखण्ड, अध्याय 6 ; 138-144.)

## 7 : 8 GOMŪTRA HARĪTAKĪ (गोमूत्र हरीतकी) (AFI, Part-I)

(Aṣṭāṅgahṛdaya, Uttarasthāna, Adhyāya 22 ; 102.)

गोमूत्रक्वथनविलीनविग्रहाणां
पथ्यानां जलमिशिकुष्ठभावितानाम् ।
अत्तारं नरमणवोऽप वक्त्ररोगाः
श्रोतारं नरमिव न स्पृशन्त्यनर्थाः ।। 102 ।।
(अष्टाङ्गहृदय उत्तरास्थान, अध्याय 22 ; 102.)

## 7 :12JĀTĪPHALĀDYA CŪRṆA (जातीफलाद्य चूर्ण) (AFI, Part-I)

(Śārṅgadharasaṁhitā, Madhyamakhaṇḍa, Adhyāya 6 ; 70-74)

जातीफललवङ्गैलापत्रत्वङ्नागकेशरैः ।। 70 ।।
कर्पूरचन्दनतिलैस्त्वक्क्षीरीतगरामलैः ।
तालीसपिप्पलीपथ्यास्थूलजीरकचित्रकैः ।। 71 ।।
शुण्ठीविडङ्गमरिचैः समभागविचूर्णितैः ।
यावन्त्येतानि सर्वाणि कुर्याद्भङ्गां च तावतीम् ।। 72 ।।
सर्वचूर्णसमा देया शर्करा च भिषग्वरैः ।
कर्षमात्रं ततः खादेन्मधुना प्लावितं सुधीः ।। 73 ।।
अस्य प्रभावाद् ग्रहणीकासश्वासारुचिक्षयाः ।
वातश्लेष्मप्रतिश्यायाः प्रशमं यान्ति वेगतः ।। 74 ।।
(शाङ्र्गधरसंहिता, मध्यमखण्ड, अध्याय 6 ; 70-74.)

## 7 : 18 NĀRASIṀHA CŪRṆA (नारसिंह चूर्ण) (AFI, Part-I)

(Bhaiṣajyaratnāvalī, Vājīkaraṇādhikāra ; 30-37.)

शतावरीरजः प्रस्थं प्रस्थं गोक्षुरकस्य च ।
वराह्या विंशतिपलं गुडूच्याः पञ्चविंशतिः ।। 30 ।।
भल्लातकानां द्वात्रिंशच्चित्रकस्य दशैव तु ।
तिलानां शोधितानाञ्च प्रस्थं दद्यात् सुचूर्णितम् ।। 31 ।।
त्र्यूषणस्य पलान्यष्टौ शर्करायाश्च सप्ततिः ।।
माक्षिकं शर्करार्द्धेन माक्षिकार्द्धेन वै घृतम् ।। 32 ।।
शतावरीसमं देयं विदारीकन्दजं रजः ।
एतदेकीकृतं चूर्णं स्निग्धे भाण्डे निधापयेत् ।। 33 ।।
शाणार्द्धमुपयुञ्जीत यथेष्टञ्चास्य भोजनम् ।
मासैकमुपयोगेन जरां हन्ति रुजामपि ।। 34 ।।
वलीपलितखालित्यमेहपाण्ड्वाढ्यपीनसान् ।
हन्त्यष्टादशकुष्ठानि तथाष्टावुदराणि च ।। 35 ।।
भगन्दरं मूत्रकृच्छ्रं गृध्रसीञ्च हलीमकम् ।
क्षयञ्चैव महाव्याधिं पञ्चकासान् सुदारुणान् ।। 36 ।।
अशीतिं वातजान् रोगांश्चत्वारिंशच्च पैत्तिकान् ।
विंशतिं श्लैष्मिकांश्चापि संसृष्टान् सन्निपातिकान् ।।
सर्वानर्शोगदान् हन्ति वृक्षमिन्द्राशनिर्यथा ।। 37 ।।
(भैषज्यरत्नावली, वाजीकरणाधिकार ; 30-37.)

## 6 : 19 DĀḌIMĀDI GHṚTA(दाडिमादि घृत) (AFI, Part-I)

(Aṣṭāṅgahṛdaya, Cikitsāsthāna, Adhyāya 16 ; 2-4.)

दाडिमात्कुडवो धान्यात्कुडवार्ध पलं पलम् ।
चित्रकाच्छृंगवेराच्च पिप्पल्यर्धपलं च तैः ।। 2 ।।
कल्कितैर्विंशतिपलं घृतस्य सलिलाढके ।
सिद्धं हृत्पाण्डुगुल्मार्शःप्लीहवातकफार्तिनुत् ।। 3 ।।
दीपनं श्वासकासघ्नं मूढवातानुलोमनम् ।
दुःखप्रसविनीनां च वन्ध्यानां च प्रशस्यते ।। 4 ।।
(अष्टाङ्गहृदय चिकित्सास्थान, अध्याय 16 ; 2-4.)

## 6 : 5 INDUKĀNTA GHṚTA(इन्दुकान्त घृत) (AFI, Part-I)

( Sahasrayoga, Ghṛtaprakaraṇa ; 5.)

पूतीकदारुदशमूलकषायसिद्धं ।
सक्षीरषट्पलयुतं घृतमिन्दुकान्तम् ।।
(सहस्रयोग, घृतप्रकरण ; 5.)

## 6 : 35 MAHĀ TRIPHALĀDYA GHṚTA (महात्रिफलाद्य घृत)(AFI, Part-I)

(Bhaiṣajyaratnāvalī, Netrarogādhikāra ; 173-180.)

त्रिफलायाः रसप्रस्थं प्रस्थं भृंगरसस्य च ।
वृषस्य च रसप्रस्थं शतावर्याश्च तत्समम् ।। 173 ।।
अजाक्षीरं गुडूच्याश्च आमलक्या रसं तथा ।
प्रस्थं प्रस्थं समाहृत्य सर्वैरेभिर्घृतं पचेत् ।। 174 ।।
कल्कैः कणा सिता द्राक्षा त्रिफला नीलमुत्पलम् ।
मधुकं क्षीरकाकोली मधुपर्णी निदिग्धिका ।। 175 ।।
तत् साधुसिद्धं विज्ञाय शुभे भाण्डे निधापयेत् ।
ऊर्द्ध्वपानमधः पानं मध्ये पानञ्च शस्यते ।। 176 ।।
यावन्तो नेत्ररोगास्तान् पानादेवापकर्षति ।
नक्तान्ध्ये तिमिरे काचे नीलिकापटलार्बुदे ।। 177 ।।
अभिष्यन्देऽधिमन्थे च पक्ष्मकोपे सुदारुणे ।
नेत्ररोगेषु सर्वेषु वातपित्तकफेषु च ।। 178 ।।
अदृष्टिं मन्ददृष्टिञ्च कफवातप्रदूषिताम् ।
स्रवतो वातपित्ताभ्यां सकण्ड्वासन्नदूरदृक् ।। 179 ।।
गृध्रदृष्टिकरं सद्यो बलवर्णाग्निवर्द्धनम् ।

सर्वं नेत्रामयं हन्यात् त्रिफलाद्यं महद् घृतम् ।। 180 ।।
(भैषज्यरत्नावली, नेत्ररोगाधिकार ; 173-180.)

## 6 : 13 TIKTAKA GHṚTA (तिक्तक घृत) (AFI, Part-I)

(Aṣṭāṅgahṛdaya, Cikitsāsthāna, Adhyāya 19 ; 2-7.)

पटोलनिम्बकटुकां दार्वीपाठादुरालभाः ।। 2 ।।
पर्पटं त्रायमाणां च पलांशं पाचयेदपाम् ।
द्व्याढकेऽष्टांशशेषेण तेन कर्षोन्मितैस्तथा ।। 3 ।।
त्रायन्तीमुस्तभूनिम्बकलिङ्गकणचन्दनैः ।
सर्पिषो द्वादशपलं पचेत्तत्तिक्तकं जयेत् ।। 4 ।।
पित्तकुष्ठपरीसर्पपिटिकादाहतृड्भ्रमान् ।
कण्डूपाण्ड्वामयान् गण्डान् दुष्टनाडी व्रणापचीः ।। 5 ।।
विस्फोटविद्रधीगुल्मशोफोन्मादमदानपि ।
हृद्रोगतिमिरव्यङ्गग्रहणीश्वित्रकामलाः ।। 6 ।।
भगन्दरमपस्मारमुदरं प्रदरं गरम् ।
अर्शोऽस्रपित्तमन्यांश्च सुकृच्छ्रान् पित्तजान् गदान् ।। 7 ।।
(अष्टाङ्गहृदय चिकित्सास्थान, अध्याय 19 ; 2-7.)

## 5 : 3 GOKṢURĀDI GUGGULU (गोक्षुरादि गुग्गुलु) (AFI, Part-I)

(Śārṅgadharasaṁhitā, Madhyamakhaṇḍa, Adhyāya 7 ; 84-87.)

अष्टाविंशतिसंख्यानि पलान्यानीय गोक्षुरात् ।
विपचेत्षड्गुणे नीरे क्वाथो ग्राह्योऽर्धशेषितः ।। 84 ।।
ततः पुनः पचेत्तत्र पुरं सप्तपलं क्षिपेत् ।
गुडपाकसमाकारं ज्ञात्वा तत्र विनिक्षिपेत् ।। 85 ।।
त्रिकटु त्रिफला मुस्तं चूर्णितं पलसप्तकम् ।
ततः पिण्डीकृतस्याऽस्य गुटिका मुखयोजिता ।। 86 ।।
हन्यात्प्रमेहं कृच्छ्रं च प्रदरं मूत्रघातकम् ।
वातास्रं वातरोगांश्च शुक्रदोषं तथाश्मरीम् ।। 87 ।।
(शाङ्र्गधरसंहिता, मध्यमखण्ड, अध्याय 7 ; 84-87.)

## 5 : 1 KĀÑCANĀRA GUGGULU (काञ्चनार गुग्गुलु) (AFI, Part-I)

(Śārṅgadharasaṁhitā, Madhyamakhaṇḍa, Adhyāya 7 ; 95-100.)

काञ्चनारत्वचो ग्राह्यं पलानां दशकं बुधैः ।। 95 ।।
त्रिफला षट्पला कार्या त्रिकटु स्यात्पलत्रयम् ।
पलैकं वरुणं कुर्यादेलात्वक्पत्रकं तथा ।। 96 ।।
एकैकं कर्षमात्रं स्यात्सर्वाण्येकत्र चूर्णयेत् ।
यावच्चूर्णमिदं सर्वं तावन्मात्रस्तु गुग्गुलुः ।। 97 ।।
संकुट्य सर्वमेकत्र पिण्डं कृत्वा च धारयेत् ।
गुटिकाः शाणिकाः कार्याः प्रातर्ग्राह्या यथोचितम् ।। 98 ।।
गण्डमालां जयत्युग्रामपचीमर्बुदानि च ।
ग्रन्थीन्व्रणांश्च गुल्मांश्च कुष्ठानि च भगन्दरम् ।। 99 ।।
प्रदेयश्चानुपानार्थं क्वाथो मुण्डितकाभवः ।
क्वाथः खदिरसारस्य पथ्याक्वाथोऽथ कोष्णकम् ।। 100 ।।
(शार्ङ्गधरसंहिता, मध्यमखण्ड, अध्याय 7 ; 95-100.)

## 5 : 8 LĀKṢĀ GUGGULU (लाक्षा गुग्गुलु) (AFI, Part-I)

(Bhaiṣajyaratnāvalī, Bhagnādhikāra ; 12-13.)

लाक्षास्थिसंहृत्ककुभाश्वगन्धाश्चूर्णीकृता नागबला पुरश्च ।
संभग्नमुक्तास्थिरुजं निहन्यादङ्गानि कुर्यात्कुलिशोपमानि ।। 12 ।।
अत्रान्यतोपिदृष्टत्वात्तुल्यश्चूर्णेन गुग्गुलुः ।। 13 ।।
(भैषज्यरत्नावली, भग्नाधिकार ; 12-13.)

## 5 : 1 PAṄCĀMṚTA LAUHA GUGGULU (पंचामृत लौह गुग्गुलु)(AFI, Part-II)

(Bhaiṣajyaratnāvalī, Mastiṣkarogādhikāra ; 52-55.)

रसगन्धकताराभ्रमाक्षिकाणां पलं पलम् ।
लौहस्य द्विपलं चापि गुग्गुलोः पलसप्तकम् ।। 52 ।।
मर्दयेदायसे पात्रे दण्डेनाप्यायसेन च ।
कटुतैलसमायोगाद्यामद्वयमतन्द्रितः ।। 53 ।।
गुञ्जात्रयप्रयोगेण गदा मस्तिष्कसम्भवाः ।
स्नायुजा वातजाश्चापि विनश्यन्ति न संशयः ।। 54 ।।
नासौ संजायते देहे मनुष्याणां कदाचन ।
यं पंचामृतलौहाख्यौ गुग्गुलुर्न हरेद्गदम् ।। 55 ।।

## 6 : 27 PAṄCATIKTA GUGGULU GHṚTA
## (पञ्चतिक्त गुग्गुलु घृत)(AFI, Part-I)

(*Synonym* : (Nimbadi ghṛta) (पर्याय: निम्बादि घृत)

(Aṣṭāṅgahṛdaya, Cikitsāsthāna, Adhyāya 21 ; 57-60)

निम्बामृतावृषपटोलनिदिग्धिकानां
भागान् पृथग्दश पलान् विपचेद्घटेऽपाम् ।
अष्टांशशेषितरसेन पुनश्च तेन्
प्रस्थं घृतस्य विपचेत्पिचुभागकल्कैः ।। 57 ।।
पाठां विडङ्गसुरदारुगजोपकुल्या-
द्विक्षारनागरनिशामिशिचव्यकुष्ठैः ।
तेजोवतीमरिचवत्सकदीप्यकाग्नि-
रोहिण्यरुष्करवचाकणमूलयुक्तैः ।। 59 ।।
मञ्जिष्ठयाऽतिविषया विषया यवान्या
संशुद्धगुग्गुलुपलैरपि पञ्चसंख्यैः ।
तत्सेवितं प्रधमति प्रबलं समीरं
सन्ध्यस्थिमज्जगतमप्यथ कुष्ठमीदृक् ।। 59 ।।
नाडीव्रणार्बुदभगन्दरगण्डमाला-
जत्रूर्ध्वसर्वगदगुल्मगुदोत्थमेहान् ।
यक्ष्माऽरुचिश्वसनपीनसकासशोफ-
हृत्पाण्डुरोगमदविद्रधिवातरक्तम् ।। 60 ।।
(अष्टाङ्गहृदय चिकित्सास्थान, अध्याय 21 ; 57-60.)

## 5 : 2 PUNARNAV GUGGULU (पुनर्नवा गुग्गुलु) (AFI, Part-II)

(Bhāratabhaiṣajya-Ratnākara Tṛtīyabhāga ; 4012)

पुनर्नवामूलशतं विशुद्धं, रुबूकमूलञ्च तथा प्रयोज्यम् ।
दत्त्वा पलं षोडशकञ्च शुण्ठ्या संकुट्य सम्यग्विपचेद् घटेऽपाम् ।। 1 ।।
पलानि चाष्टादश कौशिकस्य तेनाष्टशेषेण पुनः पचेत्तु ।। 2 ।।
निकुम्भचूर्णस्य पलं गुडूच्याः पलद्वयञ्च द्विपलं प्रतीह ।
फलत्रयं त्र्यूषणचित्रकाणि सिन्धूत्थभल्लातविडङ्गकानि ।। 3 ।।
कर्षं तथा माक्षिकधातुचूर्णं पुनर्नवायाः पलमेव चूर्णम् ।
चूर्णानि दत्त्वा ह्यवतार्य शीते खादेन्नरो माषत्रयप्रमाणम् ।। 4 ।।
वातासृजं वृद्धिगदञ्च सप्त जयत्यवश्यं त्वथ गृध्रसीञ्च ।
जङ्घोरुपृष्ठत्रिकबस्तिजञ्च तथामवातं प्रबलञ्च शीघ्रम् ।। 5 ।।
(भारतभैषज्यरत्नाकर, तृतीयभाग ; 4012 )

## 5 :11 SAPTAVIṀŚATIKA GUGGULU (सप्तविंशतिक गुग्गुलु) (AFI, Part-I)

(Bhaiṣajyaratnāvalī, Bhagandarādhikāra ; 16-21.)

त्रिकटुत्रिफलामुस्तविडङ्गामृतचित्रकम् ।
शट्येला पिप्पलीमूलं हपुषा सुरदारु च ।। 16 ।।
तुम्बुरु पुष्करं चव्यं विशाला रजनीद्वयम् ।
विडसौवर्चले क्षारौ सैन्धवं गजपिप्पली ।। 17 ।।
यावन्त्येतानि चूर्णानि तावद्द्विगुणगुग्गुलुः ।
कोलप्रमाणां गुडिकां भक्षयेन्मधुना सह ।। 18 ।।
कासं श्वासं तथा शोथमर्शांसि च भगन्दरम् ।
हृच्छूलं पार्श्वशूलञ्च कुक्षिबस्तिगुदे रुजम् ।। 19 ।।
अश्मरीं मूत्रकृच्छ्रञ्च अन्त्रवृद्धिं तथा कृमीन् ।
चिरज्वरोपसृष्टानां क्षयोपहतचेतसाम् ।। 20 ।।
आनाहञ्च तथोन्मादं कुष्ठानि चोदराणि च ।
नाडीदुष्टव्रणान सर्वान् प्रमेहं श्लीपदं तथा ।
सप्तविंशतिको हन्ति सर्वरोगनिषूदनः ।। 21 ।।
(भैषज्यरत्नावली, भगन्दराधिकार ; 16-21.)

## 5 : 12 SIṀHANĀDA GUGGULU (सिंहनाद गुग्गुलु) (AFI, Part-I)

(Bhaiṣajyaratnāvalī, Āmavātādhikāra ; 130-135.)

पलत्रयं कषायस्य त्रिफलायाः सुचूर्णितम् ।
सौगन्धिकपलञ्चैकं कौशिकस्य पलन्तथा ।। 130 ।।
कुडवं चित्रतैलस्य सर्वमादाय यत्नतः ।
पाचयेत्पाकविद्वैद्यः पात्रे लौहमये दृढे ।। 131 ।।
हन्ति वातं तथा पित्तं श्लेष्माणं खञ्जपङ्गुताम् ।
श्वासं सुदुर्जयं हन्ति कासं पञ्चविधन्तथा ।। 132 ।।
कुष्ठानि वातरक्तानि गुल्मशूलोदराणि च ।
आमवातं जयेदेतदपि वैद्यविवर्ज्जितम् ।। 133 ।।
एतदभ्यासयोगेन जरापलितनाशनम् ।
सर्पिस्तैलवसोपेतमश्नीयाच्छालिषष्टिकम् ।। 134 ।।
सिंहनाद इति ख्यातो रोगवारणदर्पहा ।
वह्निवृद्धिकरः पुंसां भाषितो दण्डपाणिना ।। 135 ।।
(भैषज्यरत्नावली, आमवातावाधिकार ; 130-135.)

## 5 :4 TRAYODAŚĀṄGA GUGGULU (त्रयोदशांग गुग्गुलु) (AFI, Part-I)

(Bhaiṣajyaratnāvalī, Vatavyādhyadhikāra ; 89-92.)

आभाश्वगन्धा हवुषा गुडूची शतावरी गोक्षुरवृद्धदारकम् ।
रास्ना शताह्वा सशटी यमानी सनागरा चेति समैश्च चूर्णम् ।। 89 ।।
तुल्यं भवेत्कौशिकमत्र मध्ये देयं तथा सर्पिरथार्द्धभागम् ।
कोलार्धमात्रन्तु ततः प्रयोगान् कृत्वानुपानं सुरयाथ यूषैः ।। 90 ।।
मद्येन वा कोष्णजलेन वाथ क्षीरेण वा मांसरसेन वापि ।
कटिग्रहे गृध्रसिबाहुपृष्ठे हनुग्रहे जानुनि पादयुग्मे ।। 91 ।।
सन्धिस्थिते चास्थिगते च वाते मज्जाश्रिते स्नायुगते च दुष्टे ।
रोगान् जयेद्वातकफानुविद्धान् वातेरितान् हृद्ग्रहयोनिदोषान् ।।
भग्नास्थिविद्धेषु च खञ्जवाते त्रयोदशाङ्गं प्रवदन्ति सन्तः ।। 92 ।।
(भैषज्यरत्नावली, वातव्याध्यधिकार ; 89-92.)

## 5 : 5 TRIPHALĀ GUGGULU (त्रिफलागुग्गुलु) (AFI, Part-I)

(Śārṅgadharasaṁhitā, Madhyamakhaṇḍa, Adhyāya 7 ; 82-83)

त्रिपलं त्रिफलाचूर्णं कृष्णाचूर्णं पलोन्मितम् ।
गुग्गुलुं पाञ्चपलिकं क्षोदयेत्सर्वमेकतः ।। 82 ।।
ततस्तु गुटिकां कृत्वा प्रयुञ्ज्याद्वह्न्यपेक्षया ।
भगन्दरं गुल्मशोथावर्शांसि च विनाशयेत् ।। 83 ।।
(शाङ्र्गधरसंहिता, मध्यमखण्ड, अध्याय 7 ; 82-83.)

## 5 : 10 VĀTĀRI GUGGULU (वातारि गुग्गुलु) (AFI, Part-I)

(Bhaiṣajyaratnāvalī, Amavātādhikāra ; 87-89.)

वातारितैलसंयुक्तं गन्धकं पुरसंयुतम् ।
फलत्रययुतं कृत्वा पिट्टयित्वा चिरं रुजि ।। 87 ।।
भक्षयेत्प्रत्यहं प्रातरुष्णतोयानुपानतः ।
दिने दिने प्रयोक्तव्यं मासमेकं निरन्तरम् ।। 88 ।।
सामवातं कटीशूलं गृध्रसी खञ्जपङ्गुताम् ।
वातरक्तं सशोथञ्च सदाहं क्रोष्टुशीर्षकम् ।
शमयेद्बहुशो दृष्टमपि वैद्यविवर्जितम् ।। 89 ।।
(भैषज्यरत्नावली, आमवाताधिकार ; 87-89.)

## 5 : 9 VYOṢĀDI GUGGULU (व्योषादि गुग्गुलु) (AFI, Part-I)

(Aṣṭāṅgahṛdaya, Cikitsāsthāna, Adhyāya 21 ; 49.)

व्योषाग्निमुस्तत्रिफलाविडङ्गैर्गुग्गुलुं समम् ।। 49 ।।
(अष्टाङ्गहृदय चिकित्सा स्थान, अध्याय 21 ; 49.)

## 5 : 7 YOGAR□JA GUGGULU (योगराज गुग्गुलु) (AFI, Part-I)

(Bhaiṣajyaratnāvalī, Āmavatādhikāra ; 90-95.)

चित्रकं पिप्पलीमूलं यमानी कारवी तथा ।
विडङ्गान्यजमोदा च जीरकं सुरदारु च ।। 90 ।।
चव्येला सैन्धवं कुष्ठं रास्नागोक्षुरधान्यकम् ।
त्रिफलां मुस्तकं व्योषं त्वगुशीरं यवाग्रजम् ।। 91 ।।
तालीशपत्रं पत्रञ्च श्लक्ष्णचूर्णानि कारयेत् ।
यावन्त्येतानि चूर्णानि तावन्मात्रन्तु गग्गुलुम् ।। 92 ।।
सम्मर्द्य सर्पिषा गाढं स्निग्धे भाण्डे निधापयेत् ।
अतो मात्रां प्रयुञ्जीत यथेष्टाहारवानपि ।। 93 ।।
योगराज इति ख्यातो योगोऽयममृतोपमः ।
आमवाताढ्यवातादीन् कृमिदुष्टव्रणानि च ।। 94 ।।
प्लीहगुल्मोदरानाहदुर्नामानि विनाशयेत् ।
अग्निञ्च कुरुते दीप्तं तेजो वृद्धिं बलं तथा ।
वातरोगान् जयत्येष सन्धिमज्जगतानपि ।। 95 ।।
(भैषज्यरत्नावली, आमवाताधिकार ; 90-95.)

## 8 : 12 ŚAMBŪKĀDYA TAILA (शम्बूकाद्य तैल( (AFI, Part-I)

(Bhaiṣajyaratnāvalī, Karṇarogādhikāra ; 40.)

शम्बूकस्य च मांसेन कटुतैलं विपाचितम् ।
तस्य पूरणमात्रेण कर्णनाडी प्रशाम्यति ।। 40 ।।
(भैषज्यरत्नावली, कर्णरोगाधिकार ; 40.)

**KṢĀRA SŪTRA (क्षार सूत्र)**

(चक्रदत्त, अर्शश्चिकित्सा, 148)

भावितं रजनीचूर्णैः स्नुहीक्षीरैः पुनः पुनः ।
बन्धनात् सुदृढं सूत्रं भिनत्त्यर्शोभगन्दरम् ।। 148 ।।

कृशदुर्बलभीरूणां नाडी मर्माश्रिता च या ।
क्षारसूत्रेण तां छिन्द्यान्नतु शस्त्रेण बुद्धिमान् ।। 26 ।।
एषण्या गतिमन्विष्य क्षारसूत्रानुसारिणीम् ।
सूचीं निदध्याद् गत्यन्ते तथोन्नम्याशु निर्हरेत् ।। 27 ।।
सूत्रस्यान्तं समानीय गाढं बन्धं समाचरेत् ।
ततः क्षारबलं वीक्ष्य सूत्रमन्यत् प्रवेशयेत् ।। 28 ।।
क्षाराक्तं मतिमान् वैद्यो यावन्न छिद्यते गतिः ।
भगन्दरेऽप्येष विधिः कार्यो वैद्येन जानता ।। 29 ।।
अर्बुदादिषु चोत्क्षिप्य मूले सूत्रं निधापयेत् ।
सूचीभिर्यववक्त्राभिराचितं वा समन्ततः ।
मूले सूत्रेण बध्नीयाच्छिन्ने चोपचरेद् व्रणम् ।। 30 ।।
(सुश्रुतसंहिता, चिकित्सास्थान, अध्याय 17 ; 26-30)

# APPENDIX-10

## LIST OF SINGLE DRUGS USED IN FORMULATIONS

### 10.1 List of Single Drugs of Animal origin used in Formulations with equivalent English Names:

| | |
|---|---|
| Ajākṣīra | Goat milk |
| Dadhi (Godadhi) | Cows milk |
| Ghṛta (Goghṛta) | Clarified butter from cow□s milk |
| Gomūtra | Cow’s urine |
| Kṣaudra (Madhu) | Honey |
| Lākṣā | Laccifer lacca |
| Mākṣika (Madhu) | Honey |
| Sambūka | Pilo globosa |
| Sarpi (Goghṛta) | Clarified butter from cow□s milk |

### 10.2 List of Single Drugs of Mineral/Metal origin used in Formulations with equivalent English Names:

| | |
|---|---|
| Abhraka Bhasma | Mica |
| Gandhaka | Sulphur |
| Loha Cūrṇa | Megnatite |
| Mṛta Loha | Megnatite |
| Mṛta śulva. | Copper |
| Mākṣika dhātu Cūrṇa. | Chalcopyrite |
| Mākṣika | Chalcopyrite |
| Rajata | Silver |
| Rasa (śuddha Pārada) | Mercury |
| Sāmudra Lavaṇa | Sea salt |
| Saindhava Lavaṇa | Rock salt |

| | |
|---|---|
| Sarjikṣāra | Fuller earth |
| Sauvarcala Lavaṇa | Black salt |
| Sindhūttha (Saindhava Lavaṇa) | Rock salt |
| Viḍa Lavaṇa | Black salt |

**10.3 List of Single Drugs of Plant origin used in Formulations, with Latin Nomenclature:**

| **Name of the Drug** | **Botanical Name** |
|---|---|
| Agaru | *Aquilaria agallocha* Roxb. |
| Agnimantha | *Clerodendrum phlomidis* Linn. |
| Ājamodā | *Apium leptophyllum* (Pers.) F.V.M. ex Benth. |
| Āmalakī | *Phyllanthus embilca* (*Emblica officinalis* Gaertn.) |
| Apāmārga | *Achyranthes aspera* Linn. |
| Ārdraka | *Zingiber officinale* Rosc. |
| Arka | *Calotropis procera* (Ait.) R. Br. |
| Asana | *Pterocarpus marsupium* Roxb. |
| Aśvagandhā | *Withania somnifera* Dunal. |
| Ativisā | *Aconitum heterophyllum* Wall. Ex Royle |
| Balā | *Sida cordifolia* Linn. |
| Bākucī | *Psoralea corylifolia* Linn. |
| Bhallātaka | *Semecarpus anacardium* Linn. |
| Bhṛṅgarāja | *Eclipta alba* Hassk |
| Bibhītaka | *Terminalia bellirica* Roxb. |
| Bilva | *Aegle marmelos* Corr. |
| Brāhmī | *Bacopa monnieri* (Linn.) Wettst. |
| Bṛhatī | *Solanum indicum* Linn. |
| Bhūmyāmalkī | *Phyllanthus amarus* Schun. & Th. |

| | |
|---|---|
| Cakramarda | *Cassia tora* Linn. |
| Cavya | *Piper retrofractum* Vahl. |
| Ciñca | *Tamarindus indica* Linn. |
| Citraka | *Plumbago zeylanica* Linn. |
| Darabh | *Imperata cylindrica* (L.) Beauv |
| Dāḍima | *Punica granatum* Linn. |
| Dantī | *Baliospermum montanum* Muell-Arg. |
| Dāruharidrā | *Berberis aristata* DC |
| Devadāru | *Cedrus deodara* (Roxb.) Loud. |
| Dhānyaka | *Coriandrum sativum* Linn. |
| Drākṣā | *Vitis vinifera* Linn. |
| Elāvāluka | *Prunus* avium Linn. |
| Eraṇḍa | *Ricinus communis* Linn. |
| Gambhārī | *Gmelina arborea* Linn. |
| Gokṣura | *Tribulus terrestris* Linn. |
| Guḍūcī | *Tinospora cordifolia* (Willd.) Miers. |
| Guggulu | *Commiphora wightii* (Arn.) Bhand. |
| Haridrā | *Curcuma longa* Linn. |
| Harītakī | *Terminalia chebula* Retz. |
| Hiṁsrā | *Capparis spinosa* Linn. |
| Hiṅgu | *Ferula foetida* Regel. |
| Hrīvera | *Coleus vettiveroides* K.C. Jacob |
| Ikṣu | *Saccharum officinarum* Linn. |
| Īśvarī | *Aristolochia indica* Linn. |
| Indravāruṇī | *Citrullus colocynthis* Schrad. |
| Jambu | *Syzygium cuminii* (Linn.) Skeels |

| | |
|---|---|
| Jatāmāṁsī | *Nardostachys jatamansi* DC. |
| Jātī | *Jasminum officinale* Linn. |
| Jātiphala | *Myristica fragrans* Houtt. |
| Jivantī | *Leptadenia* reticulata Weight & Arn. |
| Jīvaka | *Malaxis acuminata* D.Don |
| Kākanāśikā | *Martynia annua* L. |
| Kākolī | *Lilium polyphyllum* D.Don |
| Kamala | *Nelumbo nucifera* Gaertn. |
| Kaṅkola | *Piper cubeba* Linn. f. |
| Kaṇṭakārī | *Solanum surattense* Burm.f. |
| Karañja | *Pongamia pinnata* (Linn.) |
| Karkaṭaśṛṅgī | *Pistacia lentiscus* Linn. |
| Kāsa | *Saccharum spontaneum* Linn. |
| Kaṭphala | *Myrica esculenta* Buch.zhHam. Ex D.Don |
| Kaṭukā | *Picrorhiza kurroa* Royle ex Benth. |
| Khadira | *Acacia catechu* (Linn. f.) Willd. |
| Kola | *Zizyphus jujuba* Lam. |
| Kṛṣṇajīraka | *Carum carvi* Linn. |
| Kṛṣṇasārivā | *Cryptolepis buchanani* Roem. & Schult. |
| Kṣīravidārī | *Ipomoea digitata* Linn. |
| Kulañjana | *Alpinia galanga* Willd. |
| Kulattha | *Vigna unguiculata* (Linn.) Walp. |
| Kunduru | *Boswellia serrata* Roxb. |
| Kuṅkuma(Vāhlīka) | *Crocus sativws* L. |
| Kūṣmāṇḍa | *Benincasa hispida* (Thunb.) Cogn. |
| Kuṣṭha | *Saussurea lappa* C.B. Clarke |

| | |
|---|---|
| Laśuna | *Allium sativum* Linn. |
| Lavaṅga | *Syzygium aromaticum* (Linn.) Merr. & L.M. Perry |
| Marica | *Piper nigrum* Linn. |
| Matsyākṣī | *Alternanthera sessilis* (Linn.) R.Br. |
| Medā | *Polygonatum cirrhifolium* Royal |
| Mocarasa (Śālmalī) | *Salmalia malabarica* (DC) Schott & Endl. |
| Mūlaka | *Raphanus sativus* Linn. |
| Mañjiṣṭhā | *Rubia cordifolia* Linn. |
| Mustā | *Cyperus rotundus* Linn. |
| Nāgakeśara | *Mesua ferrea* Linn. |
| Nimba | *Azadirachta indica* A.Juss. |
| Padmaka | *Prunus cerasoides* D.Don |
| Palāśa | *Butea monosperma* (Lam.) Kuntze |
| Pāṭolā | *Trichosanthes dioica* Roxb. |
| Pāṣāṇa Bheda | *Bergenia ciliata* (Haw.) Sternb. |
| Pāṭalā | *Stereospermum suaveolens* DC. |
| Pāṭhā | *Cissampelos pareira* Linn. |
| Pippalī | *Piper longum* Linn. |
| Priyāla | *Buchanania lanzan* Spreng. |
| Priyaṅgu | *Callicarpa macrophylla* Vahl. |
| Pṛśniparṇī | *Uraria picta* Desv. |
| Pūga | *Areca catechu* Linn. |
| Punarnavā (Rakta) | *Boerhaavia diffusa* Linn. |
| Puṣkara | *Inula racemosa* Hook.f. |
| Raktacandana | *Pterocarpus santalinus* Linn. |
| Ṛṣabhaka | *Malaxis muscifera* (Lindley) Kuntze. |

| | |
|---|---|
| Ṛddhī | *Habenaria intermedia* D.Don |
| Śaileya | *Parmelia perlata* (Huds.) Ach. |
| Śālaparnī | *Desmodium gangeticum* DC. |
| Śāli | *Oryza sativa* Linn. |
| Samaṅga (Lajjālu) | *Mimosa pudica* L. |
| Saṅkhapuṣpī | *Convolvulus pluricaulis* Choisy |
| Saptalā | *Euphorbia dracunculoides* Lam. |
| Sarala | *Pinus roxburghii* Sargent. |
| Sarṣapa | *Brassica campestris* Linn. |
| Śatāvarī | *Asparagus recemosus* Willd. |
| Śatī | *Hedychium spicatum* Ham. Ex Smith |
| Śigru | *Moringa oleifera* Lam. |
| Śṛṅgāṭaka | *Trapa natans* Linn. |
| Śthūlailā | *Amomum subulatum* Roxb. |
| Śūkṣmailā | *Elettaria cardamomum* (Linn.) Maton |
| Śuṇṭhī | *Zingiber officinale* Roxb. |
| Śūraṇa | *Amorphophallus campanulatus* (Roxb.) Blume |
| Śveta sārivā | *Hemidesmus indicus* (Linn.) R.Br. |
| Śvetacandana | *Santalum album* Linn. |
| Śvetajīraka | *Cuminum cyminum* Linn. |
| Śyonāka | *Oroxylum indicum* vent. |
| Tagara | *Valeriana wallichii* DC. |
| Tālīsa | *Abies webbiana* Lindl. |
| Tila | *Sesamum indicum* Linn. |
| Trivṛt | *Operculina turpethum* (Linn.) Silva Manso |
| Tugākṣīrī | *Bambusa bambos* Druce. |

| | |
|---|---|
| Tvak | *Cinnamomum zeylanicum* Blume |
| Tvakapatra | *Cinnamomum tamala* (Buch.-Ham) Nees & Eberm. |
| Uśīra | *Vetiveria zizanioides* (Linn.) Nash |
| Utpala | *Nymphaea stellata* Willd. |
| Vacā | *Acorus calamus* Linn. |
| Vāsā | *Adhatoda vasica* Nees |
| Viḍaṅga | *Embelia ribes* Burm.f. |
| Vidārī | *Pueraria tuberosa* DC. |
| Yaṣṭī | *Glycyrrhiza glabra* Linn. |
| Yava | *Hordeum vulgare* Linn. |
| Yavānī | *Trachyspermum ammi* (Linn.) Sprague ex Turril |

# APPENDIX-11

## BIBLIOGRAPHY


| | | |
|---|---|---|
| 1 | Vāgbhaṭa | Aṣṭāṅgahṛdaya, Ed. By Lāla Chanda Vaidya; Motīlāla Banārasī Dāsa, Vārāṇasī 1963 |
| 2 | Upādhyāya Mādhava | Āyurveda Prakāśa, Ed. By Gularāja Śarmā Miśra |
| 3 | Govinda Dāsa | Bhaiṣajyaratnāvalī, Red and Ed. Narendra Nātha Miśra, Jayadeva Vidyālaṅkāra, Haridatta Śāstrī, Lālachandajī Vaidya, Motīlāla Banārasī Dāsa, Vārāṇasī, Saṁvat 2019 |
| 4 | Bhārata | Bhaiṣajya Ratnākara Ed. By Gopinātha Gupta, Śivarāmacandra Bhattācārya, Uñjhā Pharmacy, 2nd edition,1947,Part - III |
| 5 | Cakrapāṇi Datta | Cakradatta, Ed. Jagadīśvara Prasāda, Chaukhamba Saṁskṛta Series Office, Vārāṇasī 1961 |
| 6 | Yādavajī Trikamajī Ācārya | Rasāmṛta, Motīlāla Banārasī Dāsa, Vārāṇasī 1951 |
| 7 | Vāgbhaṭa | Rasaratnasamuccaya, Ed. By Dharmānanda Śarmā, Motīlāla Banārasī Dāsa, New Delhi 2nd Edition, 1962 |
| 8 | Sadānanda Śarmā | Rasataraṅginī, Ed. By Dharmānanda Śāstrī; Motīlāla Banārasī Dāsa, Vārāṇasī Saṁvat 2016 |
| 9 | | Sahasrayoga |
| 10 | Śāraṅgdhara Ācārya | Śāraṅgdhara Saṁhitā, Red. Āḍhamalla, Ed. By Paraśu Rāma Śāstrī, Nirnaya Sāgar Press, Bombay 2nd Edition 1931 |
| 11 | Suśruta | Suśruta Saṁhitā, Ed. By Atri Deva Vidyālaṅkāra, Motīlāla Banārasī Dāsa, Vārāṇasī 3rd Edition 1960 |
| 12 | | Yogaratnākara, Chaukhamba Sanskrit Series, Vārānasī 1955 |